# maThAmnAyamahAnushAsanam

# મઠામ્નાયમહાનુશાસનમ્

## Document Information

Text title : maThAmnAyamahAnushAsanam

File name : maThAmnAyamahAnushAsanam.itx

Category : shankarAchArya

Location : doc_z_misc_shankara

Author : Adyashankaracharya

Transliterated by : Ankur Nagpal ankurnagpal108 at gmail.com

Proofread by : Ankur Nagpal ankurnagpal108 at gmail.com

Description-comments : (importance of and rules for maThas)

Latest update : March 9, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

maThAmnAyamahAnushAsanam

# મઠામ્નાયમહાનુશાસનમ્

શારદા મઠામ્નાયઃ ।
પ્રથમઃ પશ્ચિમામ્નાયઃ શારદામઠ ઉચ્યતે ।
કીટવારઃ સમ્પ્રદાયસ્તસ્ય તીર્થાશ્રમૌ પદે ॥ ૧॥

દ્વારકાખ્યં હિ ક્ષેત્રં સ્યાદ્ દેવઃ સિદ્ધેશ્વરઃ સ્મૃતઃ ।
ભદ્રકાલી તુ દેવી સ્યાદ્ હસ્તામલક દેશિકઃ ॥ ૨॥ var આચાર્યો વિશ્વરૂપકઃ
ગોમતીતીર્થમમલં બ્રહ્મચારી સ્વરૂપકઃ ।
સામવેદસ્ય વક્તા ચ તત્ર ધર્મં સમાચરેત્ ॥ ૩॥
જીવાત્મપરમાત્મૈક્ય બોધો યત્ર ભવિષ્યતિ ।
તત્ત્વમસિ મહાવાક્યં ગોત્રોઽવિગત ઉચ્યતે ॥ ૪॥

સિન્ધુ-સૌવીર-સૌરાષ્ટ્ર-મહારાષ્ટ્રસ્તથાન્તરાઃ ।
દેશાઃ પશ્ચિમદિક્સ્થા યે શારદામઠભાગિનઃ ॥ ૫॥

ત્રિવેણીસઙ્ગમે તીર્થે તત્ત્વમસ્યાદિલક્ષણે ।
સ્નાયાત્તત્ત્વાર્થભાવેન તીર્થનામ્ના સ ઉચ્યતે ॥ ૬॥

આશ્રમગ્રહણે પ્રૌઢ આશાપાશવિવર્જિતઃ ।
યાતાયાતવિનિર્મુક્ત એતદાશ્રમલક્ષણમ્ ॥ ૭॥

કીટાદયો વિશેષેણ વાર્યન્તે યત્ર જન્તવઃ ।
ભૂતાનુકમ્પયા નિત્યં કીટવારઃ સ ઉચ્યતે ॥ ૮॥

સ્વ-સ્વરૂપં વિજાનાતિ સ્વધર્મ-પરિપાલકઃ ।
સ્વાનન્દે ક્રીડતે નિત્યં સ્વરૂપો બટુરુચ્યતે ॥ ૯॥

ગોવર્ધન મઠામ્નાયઃ ।
પૂર્વામ્નાયો દ્વિતીયઃ સ્યાદ્ ગોવર્ધનમઠઃ સ્મૃતઃ ।
ભોગવારઃ સમ્પ્રદાયો વનારણ્યે પદે સ્મૃતે ॥ ૧૦॥

પુરુષોત્તમં તુ ક્ષેત્રં સ્યાંજ્જગન્નાથોઽસ્ય દેવતા ।

વિમલાખ્યાહિ દેવી સ્યાદાચાર્યઃ પદ્મપાદકઃ ॥ ૧૧॥

તીર્થં મહોદધિઃ પ્રોક્તં બ્રહ્મચારી પ્રકાશકઃ ।
મહાવાક્યં ચ તત્ર સ્યાત્ પ્રજ્ઞાનં બ્રહ્મ ચોચ્યતે ॥ ૧૨॥

ઋગ્વેદપઠનં ચૈવ કાશ્યપો ગોત્રમુચ્યતે ।
અઙ્ગબઙ્ગકલિઙ્ગાશ્ચ મગધોત્કલબર્બરાઃ ।
ગોવર્ધનમઠાધીના દેશાઃ પ્રાચીવ્યવસ્થિતાઃ ॥ ૧૩॥

સુરમ્યે નિર્જને સ્થાને વને વાસં કરોતિ યઃ ।
આશાબન્ધવિનિર્મુક્તો વનનામા સ ઉચ્યતે ॥ ૧૪॥

અરણ્યે સંસ્થિતો નિત્યમાનન્દે નન્દને વને ।
ત્યક્ત્વા સર્વમિદં વિશ્વમારણ્યં પરિકીર્ત્યતે ॥ ૧૫॥

ભોગો વિષય ઇત્યુક્તો વાર્યતે યેન જીવિનામ્ ।
સમ્પ્રદાયો યતીનાઞ્ચ ભોગવારઃ સ ઉચ્યતે ॥ ૧૬॥

સ્વયં જ્યોતિર્વિજાનાતિ યોગયુક્તિવિશારદઃ ।
તત્ત્વજ્ઞાનપ્રકાશેન તેન પ્રોક્તઃ પ્રકાશકઃ ॥ ૧૭॥

જ્યોતિર્મઠામ્નાયઃ ।
તૃતીયસ્તૂત્તરામ્નાયો જ્યોતિર્નામ મઠો ભવેત્ ।
શ્રીમઠશ્ચેતિ વા તસ્ય નામાન્તરમુદીરિતમ્ ॥ ૧૮॥

આનન્દવારો વિજ્ઞેયઃ સમ્પ્રદાયોઽસ્ય સિદ્ધિદઃ ।
પદાનિ તસ્ય ખ્યાતાનિ ગિરિપર્વતસાગરાઃ ॥ ૧૯॥

બદરીકાશ્રમઃ ક્ષેત્રં દેવો નારાયણઃ સ્મૃતઃ ।
પૂર્ણાગિરિ ચ દેવી સ્યાદાચાર્યસ્તોટકઃ સ્મૃતઃ ॥ ૨૦॥

તીર્થં ચાલકનન્દાખ્યં આનન્દો બ્રહ્મચાર્યભૂત્ ।
અયમાત્મા બ્રહ્મ ચેતિ મહાવાક્યમુદાહૃતમ્ ॥ ૨૧॥

અથર્વવેદવક્તા ચ ભૃગ્વાખ્યં ગોત્રમુચ્યતે ।
કુરુકાશ્મીરકામ્બોજપાંચાલાદિવિભાગતઃ ।
જ્યોતિર્મઠવશા દેશા ઉદીચીદિગવસ્થિતાઃ ॥ ૨૨॥

વાસો ગિરિવને નિત્યં ગીતાધ્યયનતત્પરઃ ।
ગંભીરાચલબુદ્ધિશ્ચ ગિરિનામા સ ઉચ્યતે ॥ ૨૩॥

વસન્ પર્વતમૂલેષુ પ્રૌઢં જ્ઞાનં વિભર્તિ યઃ ।
સારાસારં વિજાનાતિ પર્વતઃ પરિકીર્ત્યતે ॥ ૨૪॥

તત્ત્વસાગરગમ્ભીર જ્ઞાનરત્નપરિગ્રહઃ ।
મર્યાદાં વૈ ન લઙ્ઘ્યેત સાગરઃ પરિકીર્ત્યતે ॥ ૨૫॥

આનન્દો હિ વિલાસશ્ચ વાર્યતે યેન જીવિનામ્ ।
સમ્પ્રદાયો યતીનાં ચાનન્દવારઃ સ ઉચ્યતે ॥ ૨૬॥

સત્યં જ્ઞાનમનન્તં યો નિત્યં ધ્યાયેત તત્ત્વવિત્ ।
સ્વાનન્દે રમતે ચૈવ આનન્દઃ પરિકીર્ત્યતે ॥ ૨૭॥

શૃઙ્ગેરી મઠામ્નાયઃ ।
ચતુર્થો દક્ષિણામ્નાયઃ શૃઙ્ગેરી તુ મઠો ભવેત્ ।
સમ્પ્રદાયો ભૂરિવારો ભૂર્ભવો ગોત્રમુચ્યતે ॥ ૨૮॥

પદાનિ ત્રીણિ ખ્યાતાનિ સરસ્વતી ભારતી પુરી ।
રામેશ્વરાહ્વયં ક્ષેત્રમાદિવારાહદેવતા ॥ ૨૯॥

કામાક્ષી તસ્ય દેવી સ્યાત્ સર્વકામફલપ્રદા ।
સુરેશ્વરાખ્ય આચાર્યસ્તુઙ્ગભદ્રેતિ તીર્થકમ્ ॥ ૩૦॥ var હસ્તામલક
ચૈતન્યાખ્યો બ્રહ્મચારી યજુર્વેદસ્ય પાઠકઃ ।
અહં બ્રહ્માસ્મિ તત્રૈવ મહાવાક્યં સમીરિતમ્ ॥ ૩૧॥

આન્ધ્રદ્રવિડકર્ણાટકેરલાદિપ્રભેદતઃ ।
શૃઙ્ગેર્યધીના દેશાસ્તે હ્યવાચીદિગવસ્થિતાઃ ॥ ૩૨॥

સ્વરજ્ઞાનરતો નિત્યં સ્વરવાદી કવીશ્વરઃ ।
સંસારસાગરાસારહન્તાઽસૌ હિ સરસ્વતી ॥ ૩૩॥

વિદ્યાભરેણ સમ્પૂર્ણઃ સર્વભારં પરિત્યજન્ ।
દુઃખભારં ન જાનાતિ ભારતી પરિકીર્ત્યતે ॥ ૩૪॥

જ્ઞાનતત્ત્વેન સમ્પૂર્ણઃ પૂર્ણતત્ત્વપદે સ્થિતઃ ।
પરબ્રહ્મરતો નિત્યં પુરીનામા સ ઉચ્યતે ॥ ૩૫॥

ભૂરિશબ્દેન સૌવર્ણ્યં બાર્યતે યેન જીવિનામ્ ।
સમ્પ્રદાયો યતીનાં ચ ભૂરિવારઃ સ ઉચ્યતે ॥ ૩૬॥

ચિન્માત્રં ચૈત્યરહિતમનન્તમજરં શિવમ્ ।

યો જાનાતિ સ વૈ વિદ્વાન્ ચૈતન્યં તદ્વિધીયતે ॥ ૩૭॥

મહાનુશાસનમ્ ।
મર્યાદૈષા સુવિજ્ઞેયા ચતુર્મઠવિધાયિની ।
તામેતાં સમુપાશ્રિત્ય આચાર્યાઃ સ્થાપિતાઃ ક્રમાત્ ॥ ૩૮॥

આમ્નાયાઃ કથિતા હ્યેતે યતીનાઞ્ચ પૃથક્-પૃથક્ ।
તૈઃ સર્વૈશ્ચતુરાચાર્યૈર્નિયોગેન યથાક્રમમ્ ॥ ૩૯॥

પ્રયોક્તતવ્યાઃ સ્વધર્મેષુ શાસનીયાસ્તતોઽન્યથા ।
કુર્વન્તુ એવ સતતમટનં ધરણીતલે ॥ ૪૦॥

વિરુદ્ધાચરણપ્રાપ્તાવાચાર્યાણાં સમાજ્ઞયા ।
લોકાન્ સંશીલયન્ત્વેવ સ્વધર્માપ્રતિરોધતઃ ॥ ૪૧॥

સ્વ-સ્વરાષ્ટ્રપ્રતિષ્ઠિત્યૈ સઞ્ચારઃ સુવિધીયતામ્ ।
મઠે તુ નિયતો વાસ આચાર્યસ્ય ન યુજ્યતે ॥ ૪૨॥

વર્ણાશ્રમસદાચારા અસ્માભિર્યે પ્રસાધિતાઃ ।
રક્ષણીયાઃ સદૈવૈતે સ્વ-સ્વ ભાગે યથાવિધિ ॥ ૪૩॥

યતો વિનષ્ટિર્મહતી ધર્મસ્યાસ્ય પ્રજાયતે ।
માન્દ્યં સન્ત્યાજ્યમેવાત્ર દાક્ષ્યમેવ સમાશ્રયેત્ ॥ ૪૪॥

પરસ્પરવિભાગે તુ ન પ્રવેશઃ કદાચન ।
પરસ્પરેણ કર્તવ્યા હ્યાચાર્યેણ વ્યવસ્થિતિઃ ॥ ૪૫॥

મર્યાદાયા વિનાશેન લુપ્યેરન્નિયમાઃ શુભાઃ ।
કલહાઙ્ગારસમ્પત્તિરતસ્તાં પરિવર્જયેત્ ॥ ૪૬॥

પરિવ્રાડાર્યમર્યાદો મામકીનાં યથાવિધિ ।
ચતુષ્પીઠાધિગાં સત્તાં પ્રયુઞ્જ્યાચ્ચ પૃથક્-પૃથક્ ॥ ૪૭॥

શુચિર્જિતેન્દ્રિયો વેદ-વેદાઙ્ગાદિવિશારદઃ ।
યોગજ્ઞઃ સર્વશાસ્ત્રાણાં સ મદાસ્થાનમાપ્નુયાત્ ॥ ૪૮॥

ઉક્તલક્ષણસમ્પન્નઃ સ્યાચ્ચેન્મત્પીઠભાગ્ ભવેત્ ।
અન્યથારૂઢપીઠોઽપિ નિગ્રહાર્હો મનીષિણામ્ ॥ ૪૯॥

નજાતુ મઠમુચ્છિન્દ્યાદધિકારિણ્યુપસ્થિતે ।
વિઘ્નાનામપિ બાહુલ્યાદેષ ધર્મઃ સનાતનઃ ॥ ૫૦॥

અસ્મત્પીઠસમારૂઢઃ પરિવ્રાડુક્તલક્ષણઃ ।
અહમેવેતિ વિજ્ઞેયો યસ્ય દેવ ઇતિ શ્રુતેઃ ॥ ૫૧॥

એક એવાવિષેચ્યઃ સ્યાદન્તે લક્ષણસમ્મતઃ ।
તત્તત્પીઠે ક્રમેણૈવ ન બહુ યુજ્યતે ક્વચિત્ ॥ ૫૨॥

સુધન્વનઃ સમૌત્સુક્યનિવૃત્યૈ ધર્મ-હેતવે ।
દેવરાજોપચારાંશ્ચ યથાવદનુપાલયેત્ ॥ ૫૩॥

કેવલં ધર્મમુદ્દિશ્ય વિભવો બ્રહ્મચેતસામ્ ।
વિહિતશ્ચોપકારાય પદ્મપત્રનયં વ્રજેત્ ॥ ૫૪॥

સુધન્વા હિમહારાજસ્તથાન્યે ચ નરેશ્વરાઃ ।
ધર્મપારમ્પરીમેતાં પાલયન્તુ નિરન્તરમ્ ॥ ૫૫॥

ચાતુર્વર્ણ્યં યથાયોગ્યં વાઙ્મનઃ કાયકર્મભિઃ ।
ગુરોઃ પીઠં સમર્ચેત વિભાગાનુક્રમેણ વૈ ॥ ૫૬॥

ધરામાલમ્બ્ય રાજાનઃ પ્રજાભ્યઃ કરભાગિનઃ ।
કૃતાધિકારા આચાર્યા ધર્મતસ્તદ્વદેવ હિ ॥ ૫૭॥

ધર્મો મૂલં મનુષ્યાણાં સ ચાચાર્યાવલમ્બનઃ ।
તસ્માદાચાર્યસુમણેઃ શાસનં સર્વતોઽધિકમ્ ॥ ૫૮॥

તસ્માત્ સર્વપ્રયત્નેન શાસનં સર્વસમ્મતમ્ ।
આચાર્યસ્ય વિશેષેણ હ્યૌદાર્યભરભાગિનઃ ॥ ૫૯॥

આચાર્યાક્ષિપ્ત દણ્ડાસ્તુ કૃત્વા પાપાનિ માનવાઃ ।
નિર્મલાઃ સ્વર્ગમાયાન્તિ સન્તઃ સુકૃતિનો યથા ॥ ૬૦॥

ઇત્યેવં મનુરપ્યાહ ગૌતમોઽપિ વિશેષતઃ ।
વિશિષ્ટશિષ્ટાચારોઽપિ મૂલાદેવ પ્રસિદ્ધ્યતિ ॥ ૬૧॥

તાનાચાર્યોપદેશાંશ્ચ રાજદણ્ડાંશ્ચ પાલયેત્ ।
તસ્માદાચાર્યરાજાનાવનવદ્યૌ ન નિન્દયેત્ ॥ ૬૨॥

ધર્મસ્ય પદ્ધતિર્હ્યેષા જગતઃ સ્થિતિહેત્વે ।
સર્વવર્ણાશ્રમાણાં હિ યથાશાસ્ત્રં વિધીયતે ॥ ૬૩॥

કૃતે વિશ્વગુરુર્બ્રહ્મા ત્રેતાયામૃષીસત્તમઃ ।

દ્વાપરે વ્યાસ એવ સ્યાત્ કલાવત્ર ભવામ્યહમ્ ॥ ૬૪॥

મઠાશ્ચત્વાર આચાર્યાશ્ચત્વારશ્ચધુરન્ધરાઃ ।
સમ્પ્રદાયાશ્ચ ચત્વાર એષા ધર્મવ્યવસ્થિતિઃ ॥ ૬૫॥

અથોર્ધ્વં શેષા આમ્નાયાઃ વિજ્ઞાનૈક વિગ્રહાઃ
પઞ્ચમસ્તૂર્ધ્વ આમ્નાયઃ સુમેરુમઠ ઉચ્યતે ।
સમ્પ્રદાયોઽસ્ય કાશી સ્યાત્ સત્યજ્ઞાનાભિધે પદે ॥ ૬૬॥

કૈલાસઃ ક્ષેત્રમિત્યુક્તં દેવતાઽસ્ય નિરઞ્જનઃ ।
દેવી માયા તથાચાર્ય ઈશ્વરોઽસ્ય પ્રકીર્તિતઃ ॥ ૬૭॥

તીર્થં તુ માનસં પ્રોક્તં બ્રહ્મતત્ત્વાવગાહિ તત્ ।
તત્ર સંયોગમાત્રેણ સંન્યાસં સમુપાશ્રયેત્ ॥ ૬૮॥

સૂક્ષ્મવેદસ્ય વક્તા ચ તત્ર ધર્મં સમાચરેત્ ।
ષષ્ઠ સ્વાત્માખ્ય આમ્નાયઃ પરમાત્મા મઠો મહાન્ ॥ ૬૯॥

સત્ત્વતોષઃ સમ્પ્રદાયઃ પદં યોગમનુસ્મરેત્ ।
નભઃ સરોવરં ક્ષેત્રં પરહંસોઽસ્ય દેવતા ॥ ૭૦॥

દેવી સ્યાન્માનસી માયા આચાર્યશ્ચેતનાહ્વયઃ ।
ત્રિપુટીતીર્થમુત્કૃષ્ટં સર્વપુણ્યપ્રદાયકમ્ ॥ ૭૧॥

ભવ-પાશવિનાશાય સંન્યાસં તત્ર ચાશ્રયેત્ ।
વેદાન્તવાક્યવક્તા ચ તત્ર ધર્મં સમાચરેત્ ॥ ૭૨॥

સપ્તમો નિષ્કલામ્નાયઃ સહસ્રાર્કદ્યુતિર્મઠઃ ।
સમ્પ્રદાયોઽસ્ય સચ્છિષ્યઃ શ્રીગુરોઃ પાદુકે પદે ॥ ૭૩॥

તત્રાનુભૂતિઃ ક્ષેત્રં સ્યાદ્ વિશ્વરૂપોઽસ્ય દેવતા ।
દેવી ચિચ્છક્તિનામ્ની હિ આચાર્યઃ સદ્ગુરુઃ સ્મૃતઃ ॥ ૭૪॥

સચ્છાસ્ત્રશ્રવણં તીર્થં જરામૃત્યુવિનાશકમ્ ।
પૂર્ણાનન્દપ્રસાદેન સંન્યાસં તત્ર ચાશ્રયેત્ ॥ ૭૫॥

॥ ઇતિ શ્રીમદ્ભગવત્પાદસ્વામિ આદ્યશઙ્કરાચાર્યકૃતઃ
શ્રીમન્મઠામ્નાયમહાનુશાસનં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Ankur Nagpal (ankurnagpal108 at gmail.com)

*maThAmnAyamahAnushAsanam*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*